साहसिक्ये--परदारान् प्रकुरुते। तेषु सहसा प्रवर्तते इत्यर्थः। प्रतियत्ने--एधो दकस्योपस्कुरुते। [1]काण्डं गुडस्योपस्कुरुते। [2]तस्य सतो गुणान्तराधानं करोति इत्यर्थः। [3]षष्ठीसुटौ [4]करोतेः प्रतियत्न एव विधीयेते (२.३.५३/६१४) (६.१.१३९/२५५२)। प्रकथने--गाथाः प्रकुरुते। जनापवादान् प्रकुरुते। प्रकर्षेण कथयति इत्यर्थः। उपयोगे--शतं प्रकुरुते। [5]सहस्रं प्रकुरुते। [6]धर्मार्थं शतं विनियुङ्क्ते इत्यर्थः। [7]एतेषु इति किम्? कटं करोति ॥

## अधेः प्रसहने। (३३/२७०६)

[8]अकर्त्रभिप्रायार्थोऽयमारम्भः। अधिपूर्वात् करोतेः प्रसहने वर्तमानात् आत्मनेपदं भवति। प्रसहनमभिभवः अपराजयो वा। [9]तमधिचक्रे। तम[10]भिबभूव, न तेन पराजितः [11]इत्यर्थः। प्रसहने इति किम्? अर्थमधिकरोति[12]। पृथग्योगकरणमुपसर्गविशेषणार्थम् ॥

## वेः शब्दकर्मणः। (३४/२७०७)

कृञः [13]इत्यनुवर्तते। विपूर्वात् करोते[14]रकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मनेपदं भवति। कर्मशब्द इह कारकाभिधायी, न[15] क्रियावचनः। क्रोष्टा विकुरुते स्वरान्। ध्वाङ्क्षो विकुरुते स्वरान्। शब्दकर्मणः इति किम्? विकरोति पयः ॥

## अकर्मकाच्च। (३५/२७०८)

वेः कृञ इत्यनुवर्तते। विपूर्वात् करोते[16]रकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति। विकुर्वते सैन्धवाः। साधु दान्ताः शोभनं वल्गन्ति इत्यर्थः। ओदनस्य पूर्णाश्छात्रा विकुर्वते। निष्फलं चेष्टन्ते इत्यर्थः[17] ॥

## सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। (३६/२७०९)

'णीञ् प्रापणे' (धा.पा. ९०१)। अस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। [18]णीञ् प्रापणे इत्येतस्मात् धातोरात्मनेपदं भवति सम्माननादिषु [19]विशेषणेषु सत्सु। सम्माननं पूजनम्--[20]नयते चार्वी लोकायते। चार्वी बुद्धिः, तत्सम्बन्धादाचार्योऽपि चार्वी। स लोकायते [21]शास्त्रे पदार्थान् नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति। ते युक्तिभिः स्थाप्यमानाः सम्मानिताः पूजिता भवन्ति। उत्सञ्जनमुत्क्षेपणम्--माणवकमुदानयते। [22]उत्क्षिपति इत्यर्थः। आचार्यकरणमाचार्यक्रिया--माणवकमीदृशेन विधिना आत्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः सम्पद्यते। माणवकमुपनयते। आत्मानमाचार्यीकुर्वन् माणवकमात्मसमीपं प्रापयति इत्यर्थः। ज्ञानं प्रमेयनिश्चयः--नयते चार्वी लोकायते। तत्र प्रमेयं निश्चिनोति इत्यर्थः। भृतिर्वेतनम्--कर्मकरानुपनयते। भृतिदानेन [23]समीपं करोति इत्यर्थः। विगणनमृणादे[24]र्निर्यातनम्--मद्राः [25]करं विनयन्ते। निर्यातयन्ति इत्यर्थः। व्ययो धर्मादिषु विनियोगः। शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं शतं [26]विनियुङ्क्ते इत्यर्थः। एतेषु इति किम्? अजां नयति ग्रामम् ॥

---

1. काण्डगुणस्य अ, काण्डं गुणस्य ब. क. ड. ह. 2. तस्य नास्ति ब. ड. 3. षष्ठी च सुट् च अ. ब. ह. 4. कृञः अ. क, उपात् प्रतियत्ने इति सुट् अ. 5. उदाहरणमिदं नास्ति ड. फ. 6. धर्माद्यर्थं क. 7. एषु फ. 8. अकर्त्रभिप्रायार्थे फ. 9. तं हाधिचक्रे क. 10. अभिभूतवान् ह. 11. इति वा अ.ड. 12. कथम् इत्यधिकम् फ. 13. इति वर्तते फ. 14. धातोः इत्यधिकम् ड. 15. च इत्यधिकम् ड. 16. अकर्मकात् नास्ति फ. 17. अकर्मणः इति किम्? कटं विकरोति इत्यधिकम् अ.ड.फ.ह. 18. नयतेर्धातोः ह. 19. विशेषेषु क. 20. नियते ब. 21. शास्त्रे नास्ति अ. 22. ऊर्ध्वं प्राप्रयतीत्यर्थः क. 23. समीपीकरोति अ.क.ह, प्रापयति फ. 24. प्रतिनिर्यातनम् फ. 25. कारं ह. 26. सहस्रं वा इत्यधिकम् अ.